यथा विंशत्या पुरुषैः विंशतिः कुलानीति विंशतिः श्रुतिरष्टाविंशतियावत् एवं त्रिंशत् श्रुतिरष्टात्रिंशद्यावत् एवं चत्वारिंशदादौ। पङ्क्तिर्दशसङ्ख्या तामारभ्य परार्द्धान्तं दशगुणोत्तरं दशगुणाधिकं क्रमात् शतसहस्रादि भवति। क्रमादितिपदोपादानादयमर्थः एकं दशगुणितं पङ्क्तिरुच्यते। दशपङ्क्तयः शतम्। दशशतानि सहस्रम्। एवं दशगुणितं सहस्रमयुतम्। एवं लक्षनियुतादि ज्ञेयम्। तथा च। ब्रह्माण्डपुराणम्।

'एकं दश शतञ्चैव सहस्रमयुतं तथा।
लक्षञ्च नियुतञ्चैव कोटिरर्वुदमेव च॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः।
अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथाक्रमम्॥'

शतं तालव्यशकारम्। सहस्रं द्विदन्त्यसकारम्।" इति भरतः॥*॥ न्यायमते अस्या गणनव्यवहारे कारणत्वम्। एकत्वं नित्यवस्तुनि नित्यम्। अन्यत्र अनित्यम्। द्वित्वादिपरार्द्धपर्य्यन्तं अपेक्षाबुद्धेर्जायते। एवं अपेक्षाबुद्धिनाशे तेषां नाशः। पर्य्याप्तिसम्बन्धेन अनेकाश्रये तिष्ठन्ति। यथा,—

"गणनव्यवहारे तु हेतुः संख्या विधीयते।
नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते॥
द्वित्वादयः परार्द्धान्ता अपेक्षा बुद्धिजा मताः।
अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः॥
अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः।
अनेकैकत्वबुद्धिर्या सापेक्षा बुद्धिरुच्यते॥"
इति भाषापरिच्छेदः॥*॥

अपि च।

श्रीमैत्रेय उवाच।
"परार्द्धसंख्यां भगवन्! ममाचक्ष्व यया तु सः।
द्विगुणीकृतया ज्ञेयः प्राकृतः प्रतिसञ्चरः॥
श्रीपराशर उवाच।
स्थानात् स्थानं दशगुणमेकस्माद्गुण्यते द्विज।
ततोऽष्टादशमे भागे परार्द्धमभिधीयते॥
परार्द्धद्वितयं यत्तु प्राकृतः प्रलयो द्विजः।
तदाव्यक्तेऽखिलं व्यक्तं सहेतौ लयमेति वै॥"
इति विष्णुपुराणे ६ अंशे ३ अध्यायः॥

सङ्ख्यातं, त्रि, (सं+ख्या+क्तः।) कृतसङ्ख्यम्। तत्पर्य्यायः। गणितम् २। इत्यमरः॥ (यथा, भागवते। ६। १४। ३।

"रजोभिः समसंख्याताः पार्थिवैरिह जन्तवः।
तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः॥")

सङ्ख्यानं, क्ली, (सं+ख्या+ल्युट्।) सङ्ख्या। संपूर्व्वख्याधातोरनट्प्रत्ययेन निष्पन्नम्॥(यथा, मनुः। ८। ४००।

"मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम्॥"

प्रकाशः यथा, भागवते ५। १७। १७।

"ॐ नमो भगवते महापुरुषाय सर्व्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति॥"
"सर्व्वेषां गुणानां संख्यानं प्रकाशो यस्माद्।"
इति तत्र श्रीधरस्वामी॥)

सङ्ख्यावान्, पुं, (संख्या बुद्धिरस्त्यस्येति। मतुप्। मस्य वः।) पण्डितः। इत्यमरः॥ (यथा, काशीखण्डे। ८२। ८।

"रथाङ्गपाणि कृतान्ताभः सङ्ख्यावांश्च सदोजिरे॥")

सङ्ख्यायुक्ते, त्रि। इति मेदिनी॥

सङ्ख्येयं, त्रि, (संख्यातुं योग्यमिति। सं+ख्या+यत्।) सङ्ख्यायोग्यम्। तत्पर्य्यायः। गणेयम् २ गणनीयम् ३। इति जटाधरः॥ गण्यम् ४। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। ४। २५५।

"एकोऽपि भेदोऽनन्तत्वात् सङ्ख्येयस्तस्य नैव यत्॥")

सङ्गः, पुं, (षञ्जसङ्गे+घञ्।) मेलनम्। तत्पर्य्यायः। मेलकः २ सङ्गमः ३। इत्यमरः॥ (यथा, देवीभागवते। १। २०।६७।

"अम्बिका च यदा स्नाता नारी ऋतुमती तदा सङ्गं प्राप्य मुनेः पुत्त्रमसूतान्धं महाबलम्॥")

रागः। यथा। "रागसङ्गौ तु रक्तता।" इति त्रिकाण्डशेषः॥ (यथा, कुमारे। १। २७।

"अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा॥"*॥)

सङ्गदोषो यथा,—

"स मे समाधिर्जलवासमित्र-
मत्स्यस्य सङ्गात् सहसैव नष्टः।
परिग्रहः सङ्गकृतो ममायं
परिग्रहोत्थाश्च महाविवित्साः॥"

इति विष्णुपुराणे ४ अंशे २ अध्यायः॥

अन्यच्च।

"अहोऽस्य दारसंयोगः कथं तमूर्द्ध्वरेतसः।
दृष्ट्वा तयोश्च शृङ्गारं मुनिः कामी बभूव ह।
जितेन्द्रियेऽसतां सङ्गात् दोषः सांसर्गिको भवेत्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः॥

अपि च।

"असतां सङ्गदोषेण को न याति पराभवम्।
विदशैर्वन्दितो वह्निर्भस्मना सहितो यथा॥"

इति चाणक्यम्॥

किञ्च।

"यत्र यत्र स्थितो जीवस्तमोयोगेन लज्जते।
उपहासाय किं न स्यादसत्सङ्गो मनीषिणाम्॥"

इति ज्योतिस्तत्त्वम्॥

सङ्गणिका स्त्री, अप्रतिरूपकथा। इति त्रिकाण्डशेषः॥

सङ्गतं, क्ली, (सं+गम्+क्तः।) सौहार्द्दम्। इति हेमचन्द्रः॥ यथा, कुमारे। ५। ३९।

"यतः सतां सन्नतगात्रि! सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते॥")

युक्तियुक्तवाक्यम्। इति भरतः॥ तत्पर्य्यायः। हृदयङ्गमम् २॥ इत्यमरः। १।६।१८॥ (मौर्य्यवंशीयनृपतिविशेषे, पुं। यथा, भागवते। १२। १। १३॥

"सुयशा भविता तस्य सङ्गतः सुयशः सुतः॥")

सङ्गतिः, स्त्री, (सं+गम+क्तिन्।) सङ्गमः। ज्ञानम्। इति मेदिनी॥ न्यायमते। आनन्तर्य्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः। सा च षोढ़ा। प्रसङ्गः १। सङ्गतित्वे सति उपोद्घातादिभिन्नः। यथा सामान्यलक्षणायां प्रसङ्गसङ्गतिः। उपोद्घातः २। निर्द्दिष्टोपपादकत्वम्। यथा परामर्शप्रवर्त्तकज्ञाने च उपोद्घातसङ्गतिः। हेतुता ३। यथा। प्रत्यक्षप्रमाणे हेतुतासङ्गतिः। अवसरः ४। अनन्तरवक्तव्यत्वम्। यथा। उपमाने अवसरसङ्गतिः। निर्व्वाहकम् ५। कारणतानिनिर्व्वाहकं कार्य्यत्वम् यथा। अनुमाने कार्य्यतासङ्गतिः। एककार्य्यत्वम् ६। एककार्य्यकारित्वम्। यथा हेत्वाभासे एककार्य्यकारित्वसङ्गतिः। इति अनुमितिग्रन्थे जगदीशतर्कालङ्कारः॥ (मेलनम्। यथा, मोहमुद्गरे। ६।

"क्षणमिह सज्जनसङ्गतिरेका
भवति भवार्णवतरणे नौका॥"

युक्तिः। यथा,—

"त्वमद्य भव नो राजा राजपुत्त्र महायशः।
सङ्गत्या नापराध्नोति राज्यमेतदनायकम्॥"
इति रामायणे। २। ७९। ३॥)

सङ्गमः, पुं, क्ली, (सं+गम+"ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) सङ्गः। इत्यमरः॥ (यथा, साहित्यदर्पणे।

"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः।
सङ्गमे सैव तथैका त्रिभुवनमपि तन्मयं विरहे॥")

नद्यादिमेलकः। इति पुंनपुंसकलिङ्गसंग्रहटीकायां भरतः॥ स्त्रीपुंसोर्म्मिथुनीभावः। स त्रिविधः। प्रथमः १। मध्यमः २। उत्तमः ३। यथा,—

"त्रिविधं तत्समाख्यातं प्रथमं मध्यमोत्तमम्।
अदेशकालभाषाभिर्निर्ज्जने च परस्त्रियाः।
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम्॥१
प्रेरणं गन्धमाल्यानां धूपभूषणवाससाम्।
प्रलोभनञ्चान्नपानैर्म्मध्यमं साहसं स्मृतम्॥२॥
सहासनं विविक्तेषु परस्परसमाश्रयः।
केशाकेशिग्रहश्चैव सम्यक्संग्रहणं स्मृतम्॥"३॥
इति मिताक्षराधृतव्यासवचनम्॥

सङ्गरं, क्ली, (संगीर्य्यते इति। सं+गॄ+अप्।) शमीवृक्षफलम्। इति मेदिनी॥

सङ्गरः, पुं (संगृणन्ति शब्दायन्ते वीरा यत्र। सं+गॄशब्दे+अप्।) युद्धम्। (यथा, कथासरित्सागरे। ३१। ९३।

"सङ्कटे हि परीक्ष्यन्ते प्राज्ञाः शूराश्च सङ्गरे॥")

आपत्। अङ्गीकारः। (यथा, रघुः। ५।२६।

"तथेति तस्याः वितथं प्रतीतः
प्रत्यग्रहीत् सङ्गरमग्रजन्मा॥")

संवित्। इत्यमरः॥ क्रियाकारः। विषम्। इति मेदिनी॥